Critical Edition of the Sanskrit Text

॥ साकारसिद्धिशास्त्रम् ॥

विधूतकल्पनाजालगम्भीरोदारमूर्तये । G 72r
नमः समन्तभद्राय समन्तस्फुरणत्विषे ॥[1]
जीयान्मुनीन्द्रमतवार्तिकभाष्यकारः
साकारसिद्धिनयनाटकसूत्रधारः ।
संसारनिर्वृतिपथप्रथमानगर्व-
सर्वारिवीरदुरतिक्रमविक्रमश्रीः ॥
विज्ञप्तिमात्रमखिलं स्थितमेतज्जगत्त्रयम् ।
तत्रावान्तरभेदस्य बलाबलमिहोच्यते ॥

तथा हि बहिरर्थदूषणादिक्रमेण,

बाह्यं न तावदिदमेव यतः प्रकाश-
रूपं स्वतो नियमतश्च सहोपलब्धेः ।[2]
युक्त्या न चान्यदिह सम्भवि सम्भवे ऽपि
न ग्राह्यलक्षणमतो मतिमात्रमेतत् ॥ G 72v

---

1 *Pramāṇavārttika* 1.1.
2 Cf. *Pramāṇaviniścaya* 1.55ab, *api ca sahopalambhaniyamād abhedo nīlataddhiyoḥ* |.

---

2 *sphuraṇa* E^T] *spharaṇa* G 10 *dūṣaṇā°* G^{pc} E^T] *dūṣaṇām* G^{ac}

गौरगान्धारमधुरसुरभिसुकुमारशातेतरादिचित्राकारं जगत् । तथा च सूत्रम्, **विज्ञप्तिमात्रं भो जिनपुत्रा यदुत त्रैधातुकमिति**[3] यदर्थं वार्तिककारः प्रयत्नपरम्परया बहिरर्थ एव साकारवादमुद्दीपयति । कथं तर्हि भाष्यकारोपज्ञमिदमुच्यत इति चेत् । निराकारदिशान्यैर्योजितत्वात्, सत्तामात्रस्थित इवानेन प्रसाधित इत्युच्यते, न पुनस्तस्यैवोपज्ञेति ।

तत्रापरे प्राहुः । भवन्तु सितशातादयः प्रकाशैकस्वभावाः, स्वभावशून्यतां तु नातिवर्तितुमीशते । या हि युक्तिरेकानेकविरहलक्षणा बाह्यमसम्भवि सम्भावयितुमुपनीयते सा न विज्ञानस्वभावतामाबिभ्राणेभ्यः शुभ्रादिभ्यो विभेति । तस्मात्सर्वधर्मशून्यतैव ज्यायसी यथा प्रथितमागमे बहुशः । वार्तिके ऽपि,

यथा यथार्थाश्चिन्त्यन्ते विविच्यन्ते तथा तथा ॥[4]

इति । संवृतिमात्रं तु विज्ञाननीतिरिति ।

अत्रापरे समादधति । भवत्वाकाराणां बाधनादलीकत्वं प्रकाशमात्रं तु सत्यम्, तदात्मवेदनस्य भ्रान्तत्वायोगेन प्रत्यक्षत्वात् । प्रकाशस्य प्रकाश एव निजं रूपमिति न तत्तस्य विप्लवोपनीतम्, येन तद्वेदनं भ्रान्तिः स्यात् । नीलं तु रूपान्तरत्वात्विप्लवोपनीतमपि स्यादिति स्यात्तद्वेदनं भ्रान्तिः । ततो ऽस्ति नीलादौ बाधकस्यावतारो न प्रकाशे । कल्पितालीकयोस्तु निषेधो बोद्धव्यः सर्वत्रेति ॥[5]

अत्र चिन्त्यते । को ऽयं प्रकाशो नाम नीलादिभ्यो व्यतिरिक्तः, अव्यतिरेके बाधाभयानिवृत्तेः । न च व्यतिरिक्ते किञ्चित्प्रमाणमस्ति । न तावत्प्रत्यक्षम्, प्रकाशमानरूपान्नीलादपरस्योपलम्भासम्भवात् । न चानुमानम्, कदाचिदपि प्रत्यक्षतामननुभवतः केनचित्सम्बन्धग्रहणानुपपत्तेः । किं च प्रकाश आत्मसंताने

---

[3] I could only find a similar passage from texts such as *Madhyamakālokā, Viṃśatikā, Yogaratnāmala* etc. According to *Madhyamakālokā*, it is from *Āryadaśabhūmakasūtra, āryadaśabhūmakasūtre 'py uktaṃ cittamātraṃ yaduta traidhātukam iti* |.

[4] Cf. *Pramāṇavārttika* 3. 209cd, *yathā yathārthāś cintyante viśīryante tathā tathā* ||.

[5] Cf. *Prajñāpāramitopadeśa*, P 167b8-168a3, Kajiyama 1965.

---

1 °*sukumāra*° E^T] °*sumāra*° G^{ac} 2 *yadarthaṃ* E^T] *yadasvaṃ* G? 3 *ucyata* $G^{pc}E^T$] *ucyati* G^{ac} 6 °*śātā*° E^T] °*sātā*° G 7 *yā hi* G] *yadi* E^T 8 *śubhrā*° $G^{pc}E^T$] *śubhrābhri*° G^{ac} 11 *vivicyante* G] *viśīryante* E^T 14 *satyam* conj. Isaacson] *satyāmnāyaḥ* G ; *satyāmnātaḥ* conj. Isaacson 15 *bhrāntatvā*° E^T] *bhrādhikkṛti*° G the image wrongly placed. 20 °*bhayānivṛtteḥ* G] °*bhayanivṛtteḥ* E^T

ऽनुमानेन प्रतीयते परोक्षविषयेणेति का धिक्कृतिरतः परम् । व्यक्तमिदं शबरस्वामिदर्शनं शरणीकृतमिति किमत्र वक्तव्यम् । तदयं दृश्यात्मा कुम्भादिभ्यो व्यतिरेकेणानुपलभ्यमाणः सामान्यादिवन्न सद्व्यवहारगोचरीभवितुमर्हति । अन्यथा तेषामप्यनिषेधः,

नित्यत्वाङ्गीकृतेस्तच्चेत्क्रमादिविरहादसत् ।
न प्रमा व्यापकाभावो दृश्यादृष्टेरनादरे ॥

कथं वा विषाणगुणकर्मादेर्निषेध इति यत्किञ्चितेतत् । अथ नीले बोधरूपे प्रतीयमाने नीलबोधात्मनोः प्रतीतिरशक्यापह्नवेति न सिद्धानुपलब्धिरिति चेत् । तर्हि गविशाबलेये प्रतीयमाने उभयात्मप्रतीत्या प्रत्यवतिष्ठमानः कथं निषेध्यः । पृथक्प्रतीत्यभावस्तु साधारणः । अविद्यावशात्प्रकाशनीलयोरपृथक्प्रथनमिति चेत् । गुणद्रव्ययोरप्येवं भविष्यति । यदि समवायनिषेधे निर्बन्धः, किमविद्यावशात्पृथगदर्शनमथाभावादेवेति संदेह उभयोरपि शक्यः । तदेव तस्य दर्शनमिति कर्मादेरपि शक्यम्, G 73r
तृणाग्रे करिशतस्य वा ।

यद्रूपं दृश्यताप्राप्तं पृथक्तच्चेन्न दृश्यते ।
शतधा विप्रकीर्णे ऽपि नीले तद्विद्यते कथम् ॥[6]

तस्मात्,

न सन्ति सामान्यगुणादयो यथा
सितादिभेदेषु निरंशभासिषु ।
तथा प्रकाशान्तरमप्यसत्ततः
सितादिबाधे किमबाधमस्तु वः ॥

[6] Cf. *Pramāṇavārttika* 1.166, *yadrūpaṃ dṛśyatāṃ yātaṃ tadrūpaṃ prāṅ na dṛśyate | śatadhā viprakīrṇe 'pi hetau tad vidyate katham* ||

1 *'numānena* conj. E^T] *'numāne* G^{ac} 11 *śābaleye* E^T] *sābaleye* G 12 *prathanam* G] *kathanam* E^T 23 *bhāsiṣu* E^T] *bhāsriṣu* G 25 *astu vaḥ* G] *saṃbhavaḥ* E^T

किं च,

देशस्यापि भिदा यदि स्वतनुवद्भिद्येत भासो द्वयो-
रत्यन्तं तुलयैकधीविषययोरप्येवमालोकनात् ।

मायागोलकयोर्ह्यत्यन्तसादृश्येनैकबुद्धिर्भिन्ने काल एव, एकदा तु भिन्नदेशयोर्भेदनिश्चयनान्तरीयक एव पटुराभासभेदः[7] । तस्माद्देशभेदे निर्विबन्धः प्रतिभासभेदस्तन्निश्चयश्च ॥

देशे वाभिदि रूपमेव न परं रूपान्न देशो ऽपरः

ननु वातातपयोर्देशाभेदे ऽपि स्वभावभेद इति चेत् । न । तयोरवयविरूपतयोत्पत्तेरेकघनाकारयोः सप्रतिघयोरन्योन्यदेशनिवेशः । परमाणुनिकरस्तु व्यतिकरमासादयति । तथा च सति,

भिन्नात्मा मरुदातपाणुनिचयो भिन्नप्रदेशो न किम् ॥

ततो यथा स्वभावभेदस्तथा देशभेदो ऽपीति न देशो नामान्यः स्वरूपात् । ततस्तदभेदे स्वरूपाभेद एव प्रकाशस्यापि ।

तद्वद्यद्यणुसंहतेरुपगमो दोषो ऽपि तद्वद्भवेत्
स्थूले वा प्रतिघे ऽपि देशभिदया दोषस्तथैव स्थितः ।
किं च व्याप्तिरिहान्यथाप्युपरता खण्डे ऽन्यथा भासन-

---

[7] Cf. *Pramāṇavārttika* 2.104, *kvacit tad aparijñānaṃ sadṛśāparasambhavāt | bhrānter apaśyato bhedaṃ māyāgolakabhedavat* ||

---

4 °*viṣayayor* E^{T}] °*viṣayor* G^{ac} 6 *bhinne kāla* conj. Isaacson] *bhinnakāla* G 10 *vābhidi* G] *vā bhidi* E^{T} 10 *rūpān* G] *rūpaṃ* E^{T} 16 *pradeśo* G^{pc} E^{T}] *deśo* G^{ac} 18 *deśo* G^{pc} E^{T}] *de* G^{ac} 22 *sthūle* G^{pc} E^{T}] *'sthūle* G^{ac} 23–5.1 *bhāsanaprāptis* em. Isaacson] *bhāsanaprāptes* G E^{T}

प्राप्तिस्तद्वशतः सितादिनि ततो यावत्प्रकाशस्थितिः ॥

यावद्देशो हि नीलाद्याकारस्तावद्व्याप्तिविरहे खण्डप्रतिभासनप्रसङ्गो नीलादौ, तद्वशतः पृथगिष्टप्रकाशवशात् । ततो यावत्प्रकाशनं सितादेस्तावत्तस्य प्रकाशाख्यस्य स्थित्या भाव्यम् । ततस्तावद्देशव्यापिनस्तस्यापि नीलस्येवावयविपरमाणुरूपचिन्तायां पुनः साधारणदोषान्न मुक्तिः । तस्मान्न नीलादिनिषेधे कस्यचित्स्थितिर्भेदस्यैवाभावात्प्रतिभासभेदाभावादिति ॥

अथ क्षणयोरभेदभासने ऽपि यथा भेदसिद्धिर्बाधकात्, एवमिहापि । यथा हि कार्यविशेषस्य भावाभावावन्यथानुपपद्यमानौ तयोर्भेदसाधनौ तथा बाधकस्य भेदेन वृत्तिः प्रकाशनीलयोरपि । ततो बाध्यान्नीलादबाध्यः प्रकाशो भिन्न एवेति चेत् । उच्यते, अबाध्यता नाम पर्युदासप्रसज्यभेदेन द्विधा । पर्युदासो ऽपि प्रकृतव्यक्तिविषयः अस्पृश्यादिवद्बाधान्तरमेवोपनयेदिति, अब्राह्मणक्षत्रियवज्जातिपर्युदासात् ।

अबाधा नामेयं प्रमितिबलसिद्धिर्यदि मता
प्रमित्योर्नैकापि स्वविदि भिदुरायां प्रभवति ।
अभावो बाधायाः पुनरसति साधारणतया
पदे संदेहस्य प्रथयतु कथं भेदममुतः ॥

प्रसज्यप्रतिषेधपक्षे हि बाधास्फुरणमात्रमबाधार्थः । तच्च सन्दिग्धसत्ताके G73v
ऽसत्यपि समानम्, कथं ततो नीलादेर्भिन्नवस्तुरूपतां प्रकाशस्य साधयेत् । ननु नीलादिबाध्यमबाध्यस्तु प्रकाश इति भिन्नरूपसिद्धौ कः संदेह इति चेत् । नैवम्, अबाधाया बाधकास्फुरणमात्रत्वात्, सत्तासन्देहे बाधितादपि नीलाद्भिन्नरूपसिद्धेरयोगात् । अत एव पदे संदेहस्येत्युक्तम् ।

क्षणभङ्गे तु बाधकान्तरबलादशक्यस्तत्परिहारः । नैतादृशासारसाधनप्रत्याशा । न च तद्वदत्रापि शक्यमभिधातुम् । तत्र हि कदाचिन्मधूदकाहरणादिवत्स्थूलकालापेक्षयाध्यक्षेण व्यवहृतो ऽर्थक्रियाशक्तिक्रमः । कदाचिदशक्यो ऽपि क्षणापेक्षया सामर्थ्यायातः स्वभावभेदं वेदयेत् । सकलक्रियाक्षयिणि क्षणे ऽभावप्रसङ्गात् । कृतस्य कर्तुं न शक्यत्वात् ।

---

1 *prakāśasthitiḥ* E^{T}] *prakāśaṃ sthitiḥ* G 16 *pramityornaikā°* E^{T}] *pramityonaikā°* G 21 *tato* G^{pc} E^{T}] om. G^{ac} 21 *nanu* G] om. E^{T} 25–26 *°pratyāśā* E^{T}] *°pratyāśī* G

सो ऽयं कार्यक्रमो न कारणक्रममतिक्रमितुं क्रमत इति युक्तम् । न च तथेह प्रकाशमात्रसाध्यं किञ्चित्सिद्धमध्यक्षतः, सामर्थ्यायातं वेति । न चापोद्धारेण कार्यभेदव्यवस्थापितो ऽप्यात्मभेदः सकृदभेदभासिनि तात्त्विको भवितुमर्हति विकल्पमात्रनिवेशिनो ऽन्यत्र, प्रदीपे तमःक्षयावकाशपिञ्जरणोपयोगिप्रकाशपिशङ्गरूपवत् । अभिन्नावभासिनि चेयं चिन्ता । न च क्षणानामभेदावभासनम्, सकलकालकलाव्यापिरूपप्रतिभासस्य सकृदेव पर्यवसाने सर्वस्य त्रिकालालोकप्रसङ्गात् । न चैवमध्यक्षव्यवहार्यो ऽपि कार्यभेदो भावाभावदशाभ्यां कारणभेदाय प्रभवेत् । एकीकृत्य ग्रहणे हि य एवैकक्षणे भावो ऽभावो वा कार्यस्य स एव क्षणान्तरे ऽपि, विवेकाभावात् ।

तस्मात्क्षणमात्रस्थायिनैव रूपेण यथास्य विषयो जनकस्तथेदमिन्द्रियज्ञानमपि तदनुकारि तेनैव रूपेण ग्राहकम् । अवसायस्तु तद्व्यापारं तिरयति । अत्र तु प्रतिभास एवाभेदेन स्फुटतरो ऽनुभूयते । तथापि भेदकल्पने किमपराद्धमुपाधिसहस्रेण । न चानुपलब्धेरन्यद्बाधकं नामेत्युक्तप्रायम् । तदियमबाधा दृश्यानुपलब्धिसम्भवे प्रतिज्ञायमाना स्वयमेव विशीर्यते नोत्तरान्तरमपेक्षत इति ।

किं च बाधात्र नात्रेति पृथग्भासे द्वयोर्भवेत् ।[8]
अनिर्भासे तदङ्गस्य तत्रासिद्धिस्थितिः कुतः ॥
सिद्धो ऽपि तत्र हेतुश्चेन्न समर्थः प्रकल्प्यते ।
नूनं न साध्यसम्बद्धो नाकारे ऽपि ततः क्षमः ॥[9]
स्वभावं कारणं वार्थो ऽव्यभिचारेण साधयन् ।
कस्यचिद्बादबाधायां स्वभावान्न निवर्तते ॥
ननु प्रकाशो नीलादौ प्रतिभात्येव देहिनः ।
तन्मात्रे बाधकाभावः ख्यायमानः क्षमो न किम् ॥
नीलस्वभावभिदुरप्रकाशकथनेन किम् ।
न हि तस्यैव बाधाया विरहं वक्तुमुद्यमः ॥
नीलस्य स्यात्प्रकाशश्चेत्साहसं किमतः परम् । G74r

[8] *Sākārasaṃgraha* 21ab.
[9] *Sākārasaṃgraha* 23.

2 °*yātaṃ veti* E^T] °? G 8 *kāryasya* E^T] *kākāryasya* ditto. G 13 *bādhakaṃ* G] *vārakaṃ* E^T 16 *bhāse* E^T] *abhāse* G 18 *prakalpyate* G] *prakalpate* E^T 20 *'vyabhicāreṇa* G^{pc} E^T] *'vyabhicāreṇe* G^{ac} 24 °*svabhāvabhidur* conj.] °*svabhāvābhidur* G 26 *nīlasya syāt* E^T] *nīlasya* G 26 *sāhasaṃ* G] *prakāśaḥ* E^T

परतो ऽपि भवन्नस्य प्रकाशः शक्यवारणः ॥
नान्यतो ऽपि प्रकाशो ऽस्य प्रकाशो ऽस्यान्य एव चेत् ।
न तन्नीलं प्रकाश्येत प्रकाशे ऽन्यस्य तस्य किम् ॥
सम्बन्धस्य च बाध्यत्वात्तस्येति न समन्वयः ।
षष्ठ्या लाभे ऽपि कथमप्यशक्यो रूपसङ्करः ॥
यतः कुतो ऽपि वा तस्मात्प्रकाशो ऽस्यानपह्नवः ।
तदबाधे च न फलं न तन्मात्रं च किंचन ॥
प्रत्याशया त्वभिमतं प्रसिद्धमभिधीयताम् ।
आश्रयासिद्धिर्निर्धूता हेतवो ऽप्यत एव च ॥
अबाध्यत्वप्रसिद्ध्यर्थाः संकल्पे कल्पिते ऽथ चेत् ।
तस्यानर्थसमानत्वाद्विधिसिद्धौ न साधुता ॥
अबाधयैव सत्त्वं चेत्सत्त्वहेतुस्ततश्च सा ।
इति चक्रकमायातं मायामेतामपोहति ॥
अथाप्यबाधा बाधायाः स्फुरणे सत्यपोद्यते ।
तदभावे तु सिद्धैव संदेहपदमीदृशी ॥

वर्गधर्मस्त्वाश्रीयमाणो न चक्रकमतिक्रामति ।

आश्रयो ऽप्यस्तु हेतुस्तु कथ्यतां बाधबाधनः ।
स्वयं वेदनमेवाथ पृथग्नास्तीति दर्शितम् ॥
न च स्ववित्तिरित्येव युक्तः सम्प्रत्ययो ऽपि वः ।
स्ववित्तावपि नीलादेर्यदा बाधाभिधावति ॥
स्वसंवित्तिर्न नीलस्य यदि किं न प्रकाशते ।
प्रकाश्यतां परेणेति न शक्यमिदमीदृशम् ॥

परेण परसंविदो ऽन्यत्र विस्तरेण निरस्तत्वात् । असत्त्वान्न परमिति चेत् । मा भूत्परत्वं स्वं तु न भवतीत्येतावतैव तेनावेदनसिद्धेर्नापरमुपयोगि, स्वविन्मात्ररूपत्वात्तस्य । कल्पिततादात्म्यान्न दोष इति चेत् । बालप्रतारणमेतत्

---

10 °*siddhyarthāḥ* G] °*siddhārthāḥ* E^T 10 *saṃkalpe* G] *saṃkalpa*° E^T 10 *kalpite* G] *kalite* E^T 12 *sattvahetus* G] *sattve hetus* E^T 13 *cakrakam* G^{pc} E^T] *cakram* G^{ac} 22 *nīlāder* E^T] *nīlādiṃ* G 24 *prakāśyatāṃ* G] *prakāśyantāṃ* E^T 27 *svaṃ tu na* G] *svattvaṃ* E^T 27 *bhavatī*° G] *saṃbhavatī*° E^T 27 *tenāvedana*° G] *tena vedana*° E^T

। प्रतिभासादेव हि तादात्म्यकल्पनम्, ततकृतश्च प्रतिभास इति व्यक्तिमितरेतराश्रयत्वम् । न प्रतिभासनात्कल्पनम्, अपि तु प्रतिभासावसायादिति चेत् । सो ऽपि प्रतिभासावसायः प्रतिभासादिति चक्रकमस्तु, तादात्म्यकल्पनातः प्रतिभासस्ततस्तदवसायस्ततस्तत्कल्पनमिति । तत्कल्पनमपि न तादात्म्यकल्पनातः, किं तु कल्पनाविषयीकृतं यत्तादात्म्यं तत इति चेत् । न । तस्य कल्पनातः प्रागभावात्, अन्यथा कल्पितत्वानुपपत्तेः । न च कल्पितं क्वचिदर्थक्रियायामुपयुज्यमानमुपलब्धम्, तथात्वे सत्त्वयाताया एव प्रसक्तेः ।

एतेनालीकतादात्म्यकीर्तनमपि प्रत्युक्तम्, क्वचिदुपयोगे ऽलीकत्वस्याप्यनुपपत्तेः । अन्यथा नाममात्रक्रियायां निषेधानिर्बन्धात् । क्वचिदुपयोगिनः प्रकाशमानस्यापि बाधनादलीकत्वमविरुद्धमिति चेत् । प्रकाशस्य न तर्हि बाधितुमशक्यत्वात्क्वचिदुपयोगमपि यदि न बाधते बाधकं किमवश्यं बाधकमभिधेयमिति कुतो ऽलीकता तादात्म्यस्य । अथ सामर्थ्यादर्थशक्तिं बाधते न साक्षात् । भवतु किमत्र निर्बन्धेन शक्तिबाधायाः सिद्धत्वान्नालीकमुपयोगि तादात्म्यमिति स्थितम् ।

यदप्युच्यते । विज्ञानमेव प्रकाशरूपत्वात्प्रकाशमानमनादिभ्रान्तिवासनोपप्लवत्वाद् भ्रान्तमलीकैर्नीलादिभिराकारैः प्रख्याति स्वप्नादिवदिति, तदपि एतेन प्रतिव्यूढम् । G74v

नीलादिव्यतिरिक्तस्य विज्ञाननाम्नोरनुपलब्धेः प्रक्रियाघोषणमात्रमेतत् । साध्यशून्यः स्वप्नदृष्टान्तश्च । अपि चैवमलीकतया कारकशक्तेरभावान्नीलादिभिरितीत्थं भूतविवक्षायामपि सहप्रख्यानमात्रमर्थ इति व्यक्तमुक्तस्तत्प्रकाश्यताविरहः । तत्कथं स्वसंवेदनातिक्रमः । अथाविद्यावासनावशात्तथा ख्यातीति तत्प्रकाश्यतैव भविष्यतीति चेत् ।

एवं सत्यविद्याहेतुरेव स्यान्न प्रकाशिका । प्रकाशरूपस्य तु तस्य तस्याः सकाशादुदयः, प्रदीपस्येव स्वहेतोरिति कुतः स्वप्रकाशनाशः । एवमपि परप्रकाश्यताव्यवस्थायां चानुभवस्यापि प्रसङ्ग इति न किञ्चित्स्वप्रकाशं नाम । तथाप्यसम्भवादेव स्ववेदनान्न क्वचित्सत्तासिद्धिः । तन्नायं न्यायः, प्रकाशरू-

---

1 *tatakṛtaś* G] *tatkṛtaś* E^T 4 *kalpanam* $G^{pc}E^T$] *kālpanam* G^{ac} 7 *sattvayātāyā* G] *satyatāyā* E^T 8 *upayoge* $G^{pc}E^T$] *upayogekṛ* G^{ac} 9 °*kriyāyāṃ* $G^{pc}E^T$] °*kriyā*° G^{ac} 10 *na tarhi* $G^{ac}E^T$] *tarhi* G^{pc} 11–12 *abhidheyamiti* $G^{pc}E^T$] *abhidheyamimiti* G^{ac} 12 *'likatā tādātmyasya* G] *'likatādātmyasya* E^T 16 *alikair* G] *alokair* E^T 18 °*nāmnor* G] °*nāmno* E^T? 19 *nīlādibhir* G] *nīlādir* E^T 20 *tatprakāśyatā*° E^T] *tatraprakāśyatā*° G? 26 *svavedanān* G] *svasaṃvedanān* E^T

पजनकापेक्षया क्षयः स्वसंवित्तेरिवेति, एवं नीलादेरपीति सिद्धा स्वसंवित्तिः । अथालीकत्वान्न कार्यता ततः प्रकाशनमात्रमविद्यया प्रकाशेन वा, अनुभवस्य तु वस्तुत्वात्समनन्तरप्रत्ययेन जननमेवोच्यत इति चेत् । तदपि यत्किञ्चित् । अनुभवो ऽपि हि स्वसंवेदनादेव वस्तु, ततो नीलस्यालीकत्वं नाम तदभावात्ततभावश्चालीकत्वात्कार्यतापरिपन्थिन इति ॥

अपि च, नीलमलीकमस्तु न वा, कार्यता तु कथं वार्यते । अपेक्षितपरव्यापारो हि स्वभावनिष्पत्तौ भावः कार्य उक्तः ॥

कादाचित्कतया सिद्धा नीलस्यास्य सहेतुता ।
नित्यं सत्त्वमसत्त्वं वाहेतोरन्यानपेक्षणात् ॥[10]

एवं देशाद्यनियमो ऽप्युपलक्षणीयः । न चान्यस्यापि कार्यताव्यवहारनिबन्धनमन्यदस्ति देशकालप्रतिनियमसिद्धां परायत्ततामवधूय । अन्यथा चानुभवस्यापि मा भूत् । तदयं श्रद्धामात्रविषयस्य तादृशादेव जन्मजल्पनं दृष्टात्कुतश्चिदाकारादाकारान्तरस्य दृष्टानुत्पत्तिं प्रतिक्षिपतीति किमत्र ब्रूमः । एतेनाभूत्वाभावे ऽपि शक्त्यभावान्न कार्यत्वमिति निरस्तम्, उक्तक्रमेण शक्तिव्यवस्थानात् । श्रद्धाविषयस्य तु चिन्त्यतामदर्शनात् । मा भूद्वाशक्तिः, परापेक्षोदयतया कार्यत्वं तु किं निवर्तते, अतद्व्यावृत्तिरनपायात् ।

अथ वस्तुधर्मकार्यत्वम्, न च शक्तिमन्तरेण वस्तुत्वम् । तर्हि शक्तिरप्यस्तु, तद्व्याप्तवस्तुवस्तुधर्मकार्यत्वस्य दर्शनात् । शक्त्यभावात्तदेव नास्तीति चेत् । न, असिद्धत्वात् । कार्यत्वे तु न संदेहः कार्यान्तरवत् । तस्माद्यदि शक्तिकार्यत्वयोः प्रतिबन्धः शक्तिरनुमीयमाना क्वचिदस्तु नानूहमात्रेण प्रतिक्षेपः । प्रतिबन्धाभावे तु सिद्धं कार्यत्वम् । अतः कथमुच्यते नीलस्याकार्यत्वात्प्रकाशमात्रहेतुभिर्यतो न स्वसंवेदनमिति । G 75r

किं च, प्रकाशनमात्रं कस्यचित्केनचिदित्यप्रतीतोपादानान्तरसम्भवे पूर्वाप-

[10] Cf. *Pramāṇavārttika* 1.179, *kādācitkatayā siddhā duḥkhasyāsya sahetutā | nityaṃ sattvam asattvaṃ vāhetor anyānapekṣaṇāt* ||

1 *iveti* conj.] *iti* E^T *ivati* G 2 *athālikatvān* G] *athānīlasyālikatvān* E^T 6 °*vyāpāro* E^T] °*vyāpā** dam. G 10 *vāhetor* G] *vā hetor* E^T 10 *apekṣaṇāt* G] *avekṣaṇāt* E^T 14 *dṛṣṭāt* G^{pc} E^T] *ṣṭāt* G^{ac} 14–15 *ākārād* G] om. E^T 17 *bhūd vāśaktiḥ* G] *bhūt śaktiḥ* E^T 18 °*vyāvṛttir* G] °*vyāvṛtter* E^T 19 *vastudharma°* G] *vastudharmaḥ* E^T 20 °*vastu °* G] om. E^T 23 *kāryatvam* G^{pc} E^T] *kāryantavaṃ* G^{ac} 25 °*topādānā°* E^T] °*torpadānā°* G ?

रक्षणानामभेदाध्यवसायाद्घटादिवदालोकेन स्यादपि वक्तुम् । अलीकाभिमते तु कीदृशी दुर्गृहीतिरियम् । अपूर्वोत्पत्तिस्तु न विरुध्यते, केवलं नीलतयेव प्रकाशतयापीति । मा भूद्वा सर्वथा कार्यत्वम्, तदापि परापेक्षानियमे परप्रकाश्यताशङ्कापि स्यात् । सर्वथा निरपेक्षत्वे निःसंशयः स्वयं वेदनभावः सर्वाकाराणाम् । तत्र च बाधसंदर्शने ऽन्यत्रापि सिद्धः सत्ताश्वासविरहः । अथवा,

नीलाद्भिन्नमबाधया यदि मनो बाधाविधूतिः कुतो
ऽनारोपादिति यद्यबाधनफलादन्योन्यभावाश्रयः ।

बाध्यमानमेव हि नीलमारोपितमाहुः । तदबाध्यताया एव फलमनारोपितत्वं कथमबाधसिद्धये प्रभवेत् ।

विज्ञानस्य तदेव रूपमिति चेन्नीलात्मनस्तन्न किम्

यथा हि प्रकाशस्य प्रकाश एव रूपं न तत्तस्य विप्लवोपनीतमित्युच्यते, तथा नीलस्यापि नीलतैव रूपं न तत्तस्य विप्लवोपनीतमित्युच्यमानमपि न वक्त्रं वक्रीकरोति । न च न्यायस्य विभागेन वृत्तिः, यतः एकमुपादेयं हेयमन्यदिति स्यात् । अथ नीलप्रकाशमन्तरेण न नीलस्थितिः, नीलमन्तरेणापि न प्रकाशस्थितिः । पीते ऽस्तीति चेत् । अस्तु, न तु नीलधर्मः । प्रकाशशब्दसाम्याच्चेत् । तर्हि पीतधर्मप्रकाशापेक्षया प्रकाशविनाकृतस्यापि नीलस्य स्थितिरपह्नवस्य विषयः ।

ततस्तस्य तदेव रूपमिति नेयं प्रकाशैकनियता कल्पना, यतस्तस्यैवानारोपितत्वेन बाधावैधुर्याश्वासः । उभयोस्तर्हि परस्परं व्यभिचारादनायाससिद्धो भेदः सिध्यतु । नीलोत्पलं च निदर्शनं स्मारयामः, वस्त्रोदकस्य निदर्शयितुमशक्यत्वात् । स्थितिप्रच्युतिलक्षणयोरिव विरुद्धयोर्धर्मयोरुद्दिष्टाधारयोरनुपलब्धेरेवेति भवन्त एवात्र प्रमाणम् । तदलमभिनिवेशवशतया । तस्य तदेव रूपमिति श्रद्धेयस्य,

---

4 *vedanabhāvaḥ* G] *vedanābhāvaḥ* E^T 7 *mano* G] *mataṃ* E^T 10 *hi* G] om. E^T
10 *tadabādhyatāyā* G] *tadā bādhyatāyā* E^T 15 *tattasya* G] *tu tasya* E^T 18 *nīla°* G] om. E^T
23 *°odakasya* G^{pc} E^T] *°odaka* G^{ac}

सङ्कल्पैकनिवेशिनो यदि तथा निर्भासिनः किं न तत् ॥

सत्यत्वं नीलस्य, केवलं स्वरूपनिर्भास एवास्य सत्तासिद्धावधिको ऽपराधः । किं चापूर्वो ऽयमुपायस्तस्य तदेव तत्त्वमिति बाधाविधूतये । बाध्यमपि हि प्रधानसामान्यादि,

यद्येन रूपेण विकल्पितं वा
विभाति वा तस्य तदेव तत्त्वं ।
प्रमाणतस्तत्तु सदन्यथा वा
बाधावकाशो द्वितये ऽपि तस्मात् ॥

नीले प्रकाशे वा । यदि परमसिद्ध्यादिदोषस्य विभागेन वृत्तौ विभागः, न तु तदेव तत्त्वमिति कृत्वा । किं च,

आरोपितं कल्पितमेव बाध्यं
प्रकाशभृद्बाध्यमलीकमाहुः ।
तत्त्वं ततः कल्पितनिष्ठमेव
मा वास्तु दृश्यैकगतं कथं स्यात् ॥

आरोपितत्वं जलवत्कल्पित एव व्यवह्रियते केवलं बाध्ये । प्रकाशमानं तु बाधितमलीकमपि व्यपदिशन्ति, द्विचन्द्रवत् । ततो यदि दृश्यमप्यारोपितमिति वक्तव्यमुच्यताम् । दृश्यमेवारोपितमिति तु कुत एतत् । तस्मान्न कल्पितमा- G75v
रोपपरिहारेण व्यवस्थितं प्रमाणसिद्धादन्यत्र । अतः प्रमाणेन सिद्धिर्बाधा वा निरूपणमर्हति । न तु तस्य तदेव तत्त्वमित्येव बाधोद्भूतिः सिद्धिर्वा ।

तदयमपि विभागः क्रियमाणो नीलादयः संवृतिसन्तः प्रतीयमानत्वे ऽपि बाध्यमानत्वात् । नीलादिप्रतिभासं तु प्रकाशशरीरं विज्ञानं परमार्थसत्, बाधकायोगात्प्रमाणसिद्धशक्तियोगाच्चेति हस्तसमारचित एव प्रतिभाति । नीलव्यतिरिक्ते हि प्रकाशे नीलवद्व्यापकानुपलम्भस्य पक्षधर्मोपसंहारो नानिच्छामा-

12 *nīle* G^{pc} E^{T}] *le* G^{ac} 27 *hasta°* G^{pc} E^{T}] *hastaṃ°* G^{ac}

त्रेण निवर्तेत इत्याद्युक्तम् । बाधा च प्रकाशाभिमतस्याप्रकाशात्कीदृशी परेत्यपि । तथा शक्तिरप्याकारगोचरैव इत्यनन्तरम् ।

व्यतिरेकश्चायं कृतकानित्यत्ववत्कल्पनामात्रोपनीतः प्रतिभाति, न साक्षान्निर्भासी । यमलकवत्, द्विचन्द्रवद्वा । भिन्ने च प्रतिभासमाने धर्मिणि शक्यमधिगन्तुमत्र धर्मो ऽयं सम्भवी, न सम्भवी चात्रेति । विशेषतो व्यापकानुपलम्भस्य विपर्ययेण वस्तुधर्मस्यैवोपनेयत्वात् । सर्वश्च भेदसाधनो व्यवहारसाधन एव, विरुद्धधर्मसंसर्गमन्तरेण क्वचिदपि भेदासिद्धेः । अन्यथा न क्वचिदभेदो नाम विरुद्धौ च धर्मौ न कल्पनामात्रेण भिन्नः । प्रमाणतश्च भिन्नाधिकरणावेव प्रत्येतव्यौ, निराधारयोरभिन्नाधारयोर्वा प्रतीतौ न प्रमाणाप्रमाणयोरन्यतरव्यापारो विरोधसिद्धिर्वा । भिन्नधर्मिणोश्च तयोः सिद्धौ को ऽपरो धर्मिभेदसाधनव्यवसायः ।

अत एव व्यवहारसिद्धिर्मुखं प्रतीति निर्णयः । तत्र धर्मिभेदसिद्धिः क्वचिद्देशभेदेन गोलकवत्, क्वचित्कालभेदेन । यदधिकारेणोच्यते, अत एव तयोरवस्थयोः वस्तुभेदो निश्चेय इति । न हि तत्रापीयं कुशूलावस्था, इयं क्षेत्रावस्था चेति । कालभेदेनानुपदर्शने करणाकरणाभ्यां भेदः शक्यनिर्देशः ।

तावता च भेदसिद्धिरवसितेति क्रियाक्रियोपन्यासो व्यवहारसाधन एव । यत्र तु न देशकालाभ्यां भेदोल्लेखः, तत्र प्रतिभासभेद एव शरणमिन्द्रियभेदो वा । पानकस्य रूपरसादिवत्, चार्वाकस्य स्वाभ्युपगम इव बुद्धिशरीरयोः । स हि शैलादिविकल्पं करचरणाद्याकाराच्छरीराद्विसदृशमनुदाहरणे केनाकारेण शैलादिविकल्पतां स्फुटयेत् । यत्र प्रतिभासभेदगन्धो ऽपि नास्ति कल्पनाकारादन्यस्तत्र नीलोत्पलादिवदभेद एव तात्त्विकः ।

अभिन्नवेदनस्यैक्ये यन्नैवं तद्विभेदवत् ।
सिध्येदसाधनत्वे ऽस्य भेदाभेदौ किमाश्रयौ ॥[11]

[11] Cf. *Pramāṇavārttika* 2.278.

1 *nivarteta* E^{T}] *nivartata* G 2 °*gocaraiva ity anantaram* E^{T}] °*gocaraivety antaṃ nantaraṃ* G 6 *viparyayeṇa* G^{pc} E^{T}] *viparyaṇa* G^{ac} 6 *sarvaś* E^{T}] *sa*∗ G dam. 8 °*ādhikaraṇāv* G^{pc} E^{T}] °*ābhidhikaraṇāv* G^{ac} 9 *abhinnā*° G] *bhinnā*° E^{T} 13 °*nocyate* G^{pc} E^{T}] °*notcyate* G^{ac} 17 *pratibhāsa*° G^{pc} E^{T}] *pratibhosa*° G^{ac} 19 *anudāharaṇe* E^{T}] *anudāharana* G 20 °*vikalpatāṃ* G^{pc} E^{T}] °*vikatāṃ* G^{ac} 23 *tad vibhedavat* G] *taddhi bhedavat* E^{T} 24 *asādhanatve* G] *asādhanatva* E^{T}

इत्यन्तरश्लोकः । तस्माद्बाधाबाधलक्षणविरुद्धधर्माध्यासो धर्मिणः प्रतिभासभेदमन्तरेण न भेदव्यवहाराय प्रभवति । केवलं भेदसाधनं सत्तासाधनरूपत्वान्न त्रयीं G76r
दोषजातिमतिपतति । यदप्युच्यते, यद्येन रूपेण नैकं नानेकं, न तत्तेन सत् । तद्यथा दुःखं सुखरूपेण, नैकं नानेकं च विज्ञानं नीलादिरूपेणेति व्यापकानुपलब्धिरिति । तदपि हृदयपरितोषमात्रमेतेनैव निरस्तम् । तथा हि न विज्ञायते न विजानातीति वा व्यापारनिबन्धनं विज्ञानत्वमिष्टमन्यत्र निषेधात्, किं तु स्वप्रकाशतास्वभावम् । स च प्रकाशस्तेनात्मना असन्निति न तादात्म्यनिषेधमात्रमभिमतम् । किं तु स्वेनात्मनासन्नेवेति ।

अनेन तद्वद्दोषानवतारादित्यप्याक्षिप्तम् । अन्यथा न व्यतिरेकसिद्धिर्बन्ध्यासुतो ऽपि व्यवच्छेदमात्रेण प्रसङ्गात् । ततश्च बाधाबाधाभ्यामेव भेदसिद्धिरित्यस्मान्न कश्चिदतिरिक्तो ऽर्थ उपात्त इति तेनैव गतमेतत् । तथापि किञ्चिदुच्यते । इहाकारव्यतिरिक्तप्रकाशसाधनप्रकरणे ऽप्रतिभासमान एव वा प्रकाशो ऽनुमानेन साधयितव्यः । प्रतिभासमान एव वाकाराद्व्यतिरिक्तो विधातव्यः । उभयथापि तु विधिसाधनाधिकारे कः प्रस्तावो व्यापकानुपलम्भस्य । तदाहितेन रूपेण सत्त्वे ऽपि स्वरूपेण यद्यसत्त्वशङ्काया न निवृत्तिः । शृङ्गस्येव कुतो भेदसिद्धिः ।

अथ तयोरभावो भावान्तरस्वभाव एवाभिमतः । तदा स्वभावहेतुरेव प्रयोक्तव्यः विधिविषयत्वाद्विवादस्य । यदा तु तदभावे ऽपि तत्स्यादिति संशयीत कश्चित्तन्मात्रे युक्तो व्यापकानुपलम्भः । न चैकानेकवियोगे ऽपि सत्त्वशङ्कायाः प्रस्तावः । न च विपर्ययविवक्षायां क्षेमः । तदा हि यद्येन रूपेण सत्, तत्तेन एकमनेकं वेति दर्शनीयम् । न चात्र दृष्टान्तः पक्षधर्मोपसंहारो वा शक्यनिर्वाहः । न हि प्रकाशमात्रं क्वचित्सिद्धमन्यस्य चासत्त्वादिति कुतो दृष्टान्तः, क्व पक्षधर्मोपसंहारो वा, अन्यसाधनाभावात्, तत्साधनत्वे वानवस्थाप्रसङ्गात् ।

प्रकाशश्च प्रकाशरूपेण सन्निति पक्षधर्मोपसंहारकाले वा नाप्रकृतोपलम्भपरिहारः । न हि स्वरूपेणैकानेकत्वे विवादः । किं त्वाकारेण सह भेदाभेदे एकानेकत्वविवादिनो वा सत्त्वसिद्धिरिति कुतः । शक्त्यासिद्धं सत्त्वमेकत्वादिसाधयेदिति चेत् । शक्त्यभावादेव तर्हि नीलादिरसन्नेकानेकत्वे ऽपीति किं तदुपन्यासप्रयासेन, तदभावे ऽपि प्रसज्यशक्त्या सत्त्वव्यवस्थापनात् । अन्यथा तत्संशये च

---

3 *sat* E^T] *sata* G 5 *na* E^T] *nena* G 15 *sattve 'pi svarūpeṇa* $G^{pc}E^T$] om. G^{ac} 15 *yady* G] *yadi* E^T 15 *°śaṅkāyā* G] *°śaṅkāyāḥ* E^T 21 *cātra dṛṣṭāntaḥ* E^T] *cāpy adṛṣṭāntaḥ* G? 23 *tatsādhanatve* $G^{pc}E^T$] *tsātsādhanatve* G^{ac} ditto. 24 *nā°* $G^{pc}E^T$] om. G^{ac} 25 *vivādaḥ* $G^{pc}E^T$] *vivāvādaḥ* G^{ac} ditto. 26–27 *śaktyāsiddhaṃ sattvam ekatvādisādhayed iti cet* G] om. E^T

कथमवस्थापयेत् । सा च चिन्तयिष्यते ।

अथ तेनैकानेकभाव इति स्वरूपेण एकानेकभावः, ततस्तेनैव सत्त्वमित्यभिमतम् । तदापि किं पुनरस्य तत्स्वरूपं येनैकानेकतायोग इति प्रश्ने यदीदमेव तर्जनीनिर्देशयोग्यमिति उच्यते, तदा नीलमेतदिति न तेनैकानेकं विज्ञानमिति प्लवत एतत् । अथान्यत् । तन्न सिद्धम् । सिद्धौ वा किमनेन । स चोपलम्भस्तदवस्थः । भिन्नस्य हि सिद्धावेव विवादः, न तु तस्मिनसिद्धे ऽपि G 76v
किं पररूपेणापि तस्य सत्त्वमिति प्रस्तावः ॥

अथ सिद्ध एवायं प्रकाशो धर्मी, तस्य नीलादिरूपेणासत्त्वसिद्धौ सामर्थ्यलब्धो भेदः । तावता च सिद्धमभिमतमतो न विधेरनुरोध इति व्यापकानुपलम्भ एव प्रकृतोपयोगीति चेत् । महतीयं वैदग्धी, केवलमविद्यापि नीलादिनासन्प्रकाशो यदि स्वेनापि रूपेण तथा, तदा का भेदसिद्धिः । ननु तस्यासत्त्वाशङ्का नास्त्येव, स्वसंवेदनप्रत्यक्षसिद्धत्वात्स्वभावे भ्रान्त्यभावात् । भेदे एव हि विवादः । तादृशी तर्हि सिद्धिः नीलस्यापि कथं बाधा । प्रकाशस्य प्रकाश एव रूपमित्यादावुक्तमेव । शक्यं च नीलप्रकाशस्य नीलप्रकाश एव रूपमित्यादि वक्तुम् । ततो भेदाधिक्षेपे ऽपि यदि स्वानुभवो बाधकमनवकाशीकुर्वन्प्रकाशसत्तां साधयेत् । तथापि किमनेन, तथा अशक्तावपि किमनेन, नीलवत्तत्रापि हस्तकत्यागावर्जनात्भेदासिद्धेः ।

अथ परस्य परमार्थसत्त्वेन सिद्धः प्रकाशो भेद एव विवादस्ततः सन्नेव प्रकाशो न नीलात्मनेति साध्यसिद्धिः । सर्वोपायपरिक्षीणन्यायपर्यवसाना तर्हि वैदग्धी । तदेतदात्मवादिनो घटनैरात्म्यसिद्धिन्यायेन हेलामर्हति । किं चास्मिन्साधने ऽभेदावभासिनोरनुभवाकारयोर्भेदः प्रतिज्ञार्थः, तद्रूपेण एकानेकविरहो हेतुः । न चास्य यथोक्तसाध्येनान्वयो दृष्टान्ते दर्शयितुं शक्यः । तत्रापि दुष्खाद्याकारव्यतिरेकिणः प्रकाशस्य असिद्धेः । सिद्धावपि यथा सातमसातेनेति न वक्तव्यम् । यथा दुक्खानुभवो दुक्खाद्याकारेणेति युक्तम् ।

अन्यथा ह्याकारान्तरपरिगृहीतप्रकाशस्याकारान्तरेणासत्त्वख्यापने तदपेक्षयैव भेदः स्यात् । ततश्च साध्यकाले नीलाकारस्य पीतानुभवाद्भेदः सिध्येत् ।

---

3 *yenaikā°* $G^{pc}E^{T}$] *ekā°* G^{ac} 6 *copalambhas* G] *caupalambas* E^{T} 6 *tasmin asiddhe* G] *tasmin siddhe* E^{T} 10 *°opayogī°* $G^{pc}E^{T}$] *°oyogī°* G^{ac} 10 *prakāśo* E^{T}] *aprakāśo* G 12 *svasaṃvedanapratyakṣasiddhatvāt svabhāve* $G^{pc}E^{T}$] om. G^{ac} 14 *°ādhikṣepe* E^{T}] *°ādhikṣe* G 15 *svānubhavo* $G^{pc}E^{T}$] *svābhābhanubhavo* G^{ac} 15 *anavakāśī°* E^{T}] *avakāśī°* G 19 *°paryavasānā* G] *°paryavāsanā* E^{T} 21 *tadrūpeṇa* $G^{pc}E^{T}$] *tadrūpeṇā* G^{ac} 22 *na* $G^{pc}E^{T}$] *na sa* G^{ac} 23 *sātamasāteneti* G] *śātamaśāteneti* E^{T} 26 *sidhyeta* G] *sidhyet* E^{T}

ततो यदि स्वप्रकाशापेक्षो भेदो दृष्टान्ते नोपदर्शयितुं शक्यः साध्यो ऽपि कथं भविष्यति, अन्वयस्य एवाभावात् । यद्येन नैकानेकमिति सामान्येनान्वयो ऽत्रोक्त इति चेत् । तदसत् । यतः,

अनुक्तो ऽपीच्छया व्याप्तः साध्य आत्मार्थवन्मतः ।[12]

तदेतदपि चक्षुरादिपारार्थ्यसाधनादिना समानम् । अथवा यद्येन नैकानेकमित्यत्र यदभिन्नाभासि येनावभासिनेति विवक्षितम् । अथ सामान्येनेति विकल्प्य,

विशेषे ऽनुगमाभावः सामान्ये सिद्धसाधनम् ॥[13]

सुखदुःखयोरिव नीलपीतानुभवयोरपरस्पररूपतया तेनात्मनासत्त्वाकृष्टभेदसिद्धेः, अभेदग्राहिणस्तु प्रत्यक्षस्योभयत्रापि न क्षतिः । शेषमस्मद्बृहदीश्वरवादवत् । अपि च यदा प्रकाशश्च नैकानेको नीलादिनेति पक्षे हेतोरुपनयः, तत्र को ऽयं प्रकाशो नाम, प्रकाशनम्, प्रकाशत इति वा । अथार्थान्तरमेव किञ्चित्प्रकाशशब्दाभिधेयं प्रकाशयतीत्यादिव्यापारापेक्षया व्यवस्थितेर्निरस्तत्वात् । G77r

प्रथमपक्षे प्रकाशमानानां नीलपीतादीनां प्रकाशो नाम धर्ममात्रमेतत्, भेदान्तरप्रतिक्षेपेण भिन्नवदाभासमानमपि कल्पनाबुद्धौ न धर्मिरूपविघटने तटस्थमासितुं शक्तम्, तत्कुतस्तत्त्वतो भेदसिद्धिः । न हि धर्मिरूपमुद्धूय धर्माणां क्वचिदपि सत्त्वमस्ति, गुणकर्मादिवत् । कर्तृसाधनपक्षे तु नीलादिरेव प्रकाशत इति तस्यैव तेन रूपेण शून्यतेति पूर्ववत् ।

अर्थान्तरपक्षे च यदि प्रकाशत इति सान्वयपदं, तदा नीलादिव्यतिरिक्तस्य तस्य दृश्यानुपलब्धिबाधितस्य तेनात्मनासत्त्वे ऽपि न साध्यसिद्धिः । निरन्वयनामपक्षे ऽपि न प्रमाणसिद्धिः, तत्र च व्यवच्छेदमात्रयोः साध्यसाधनभवाश्रयादाश्रयासिद्धिपरिहारे ऽपि न प्रकृतोपयोगः । अथायमेव प्रतिविदितः प्रकाशो

---

12 *Pramāṇavārttika* 4.29cd.

13 Cf. *Sākārasaṃgraha* 103, *anukto 'pīcchayā vyāptaḥ sādhya ātmārthavanmataḥ | viśeṣeṇānvayas tasmāt sāmānye siddhasādhanam* ||

---

7 *yena* G^{pc}E^{T}] *ye* G^{ac} 7 *naikā°* G^{pc}E^{T}] *pakā°* G^{ac} 8 *yenāvabhāsineti* G^{pc}E^{T}] *neti* G^{ac} 12 *°ānubhavayor* G^{pc}E^{T}] *°ānubhayavayor* G^{ac} 24 *°nāma°* G] *°nāśa°* E^{T} 24–25 *°bhavāśrayād āśrayā°* G^{pc}E^{T}] *°bhavāśrayā°* G^{ac}

धर्मी । ननु प्रतिविदित इति प्रतिभासमानः स च नील एव, न तद्व्यतिरिक्तः कश्चित् ।

ननु तद्व्यतिरिक्तसाधनायैव यत्न एषः, कथं प्रथमतस्तत्प्रार्थनमिति चेत् । किमपि साध्यमस्तु भवतः, साधनाधारस्तु निष्ठितस्वरूपो दर्शनीयो यदि प्रकाशो नाम वस्तुरूपो धर्मी सम्भवतः । यदि तु साध्यसाधनयोर्व्यवच्छेदमात्रानुरोधातवस्तु संदिग्धवस्तुभावो वा धर्मी, तदा नायं नियमः । प्रकृतसिद्धिस्तु दूरे । अथ प्रकृतसिद्ध्यनुरोधाद्वस्तुभूतः प्रकाशो धर्मी, तदा निष्ठितस्वरूपः स्वीक्रियमाणो नील एव स्यात् । तत्र रूपं रूपस्वभावेन शून्यमित्यायातम्, तथापि न प्रकृतसिद्धिः । न च तेन शून्यतयान्येन स्थितिरित्यनाकारप्रत्याशा । मा भूदन्यरूपेणान्यस्य शून्यतया सिद्धसाधनशङ्केति तावतापि तेनेत्यस्य चरितार्थत्वात् ।

साकारनये वा तैमिरिक्तदृष्टचन्द्रद्वये चन्द्रद्वयरूपशून्यतावदध्यवसितबाह्यनिषेध एषः । सर्वत्र चारोपितस्यैव निषेधात् । सर्वत्र च स्वाकारे बहिरारोप एव पृथग्जनस्य, अन्यथा तत्त्वहानेरिति । तस्मान्न नीले धर्मिणि प्रकृतसिद्धिः । अथ किमनया विशेषनिष्ठया, प्रकाशो नाम सामान्येन धर्मी मतः । विशेषनिष्ठया च साध्यावधूतेः साधनोपन्यासप्रतिबन्धप्रसङ्गात् । न च साध्यमनभिसन्धाय साधनप्रयोगः कस्यचित् । नापि निरस्तसाध्यो धर्मी क्वचित्क्रियते, सिद्धसाध्यवत् । अतो न विशेषनिष्ठायां भरः । भवतु वा सापि ।

अयमेवासौ पुरःप्रकाशो नाम नीलेन सह यस्य पृथग्भावे सांशयिको ऽसीति भवतु दोहदोपरमः । दृष्टश्च व्यावृत्तिभेदेन धर्मधर्मिभावो यथा स्वभावहेतौ तदेका व्यावृत्तिधर्मिणी, अन्यया सह पृथग्भावः साध्य इति न कश्चिद्दोषः । तदप्यसङ्गतम् । यतः,

> युक्ता व्यावृत्तिमात्रेण साध्यसाधनसंस्थितिः ।
> धर्मिरूपं तु भेदेन दृष्टमेवोपयुज्यते ॥[14]

सामान्याकारमन्तरेण हि प्रतिबन्धबोधस्याशक्यत्वात्प्लवमानरूपयोः सा- G77v

[14] *Sākārasaṃgraha* 116.

6 *tadā nāyaṃ* G^{pc} E^{T}] *tadāyaṃ* G^{ac} 7 *svīkriyamāṇo* E^{T}] *kriyamāṇo* G 10 *śūnyatayā* E^{T}] *śūnyatayāṃ* G 13 *sarvatra cāropitasyaiva niṣedhāt* | E^{T}] *sarva†††pitasyaiva niṣedhāt* | G^{pc}, om. G^{ac} 18 *vā* G^{pc} E^{T}] *sa vā* G^{ac} 21 *anyayā* G^{pc} E^{T}] *nyayā* G^{ac} 21 *tad* G^{pc} E^{T}] *datad* G^{ac}

ध्यसाधनयोर्धर्मिस्वरूपनिष्ठयैव तत्त्वस्थितिः । न तु धर्मिरूपस्यापि प्लवमानतायां व्यावृत्तिमात्रेण, इदं च तथेति शाखिशब्दादेः स्वलक्षणानुपदर्शने ऽप्रतीतेः । व्यावृत्तिभेदस्तु भेदव्यवहारार्थमपेक्ष्यते, न धर्मिसत्तार्थं, व्यक्तिविशेषनिष्ठतया प्रतीतौ तस्या एवासिद्धिप्रसङ्गात् । यथा चायं शाखादिमान्श्रवणग्राह्यो घटादिशब्दो वा धर्मीति स्वलक्षणे धर्मिणि प्रतीते ऽपि विरोधाभावात्वृक्षक्षणिकत्वादिसंदेहे साधनानुसारः, तथा न प्रस्तुते ऽस्त्यवकाशः ।

तथा हि यावदेवायमिति तर्जनीनिर्देशयोग्यो धर्मी नीलतया उपनीतस्तावतैव भेदसंदेहप्रच्युतिर्न साधनावतारः, तन्नीलरूपमन्तरेण प्रकाशस्य रूपविशेषनिष्ठानुपपत्तेः । अप्रकाशव्यावृत्तिमात्रस्य हि क्वचिद्व्यक्तौ निष्ठायामात्मलाभः, अशब्दव्यावृत्तेरिव, न प्रत्येकापोहे । ततो ऽभावशङ्कावशान्न वस्तुसन्धर्मीष्टः सिद्धः । ततो वस्त्वपेक्षायां सर्वस्य सामान्यस्य विशेषरूपेणैवार्थकारितया वस्तुत्वान्नीलस्यैव धर्मिण उपनये पर्यवसितो भेदाभेदनिरूपणप्रक्रमः । क्षणिकादिरूपता तु संदेहविषयः स्यातप्रतिक्षेपात् ।

इह पुनरयमेव स धर्मी प्रकाशत इति नीलरूपतया वादिनैव दर्शिते किमिदानीं सभ्यैर्विवदितव्यम् । अथ पश्चात्पक्षधर्मोपसंहारे न दोषः । दोष एव, प्रकाशश्च नीलेन नैको नानेक इति पश्चादुक्तो ऽपि, को ऽसौ प्रकाश इति नीलरूपतायामेव निष्ठानात्भेदान्तरस्य दर्शयितुमशक्यत्वात्, विशेषादर्शने च धर्मिणः सद्रूपस्याशक्यनिर्वाहत्वात् । यद्यपि च स्वभावहेतावतद्रूपपरावृत्तमुभयमपि वस्तु, तथापि नैतदेव कृतकत्वादि किं त्वेतदपि । ततो दृष्टान्तसाधारणतया सामान्यमुच्यते न धर्मिरूपम् । एतदेवमित्यसाधारणेनैव रूपेण प्रवृत्तिनिवृत्त्यर्थितयापेक्षणीयत्वात् ।

अत एव साध्ये ऽपि दृष्टान्तद्वारेण विशेषजिज्ञासोच्छेदः । मा भूत्सर्वव्यक्तिवियुक्तावसत्त्वमेव । अन्ततः पक्षे ऽपि तल्लक्षणान्न व्यक्तिविरहः । क्षणिकत्वादेरप्येत एव व्यक्तिभेदाः । काल्पनिकं तु भेदमास्थाय तत्त्वतो व्यतिरेकविवेके ऽपि साध्यसाधनभावः । तथा यदि काल्पनिकेन भेदेन धर्मिभावो ऽपि स्यात्, अस्तु तेनैव रूपेण तस्य वस्तुत्वमिति स्वयमुपगमे कस्तन्निषेधाय योगः । परो वा कथमन्यदाद्रियेत यद्धर्मिरूपनिरूपणेनैव प्रतिहतम् । अत एव यथा

---

1 *niṣṭhayaiva* E^{T}] *niṣṭheyaiva* G 3 °*niṣṭhatayāḥ* G] °*niṣṭhatayā*° E^{T} 4 *śravanā*° GE^{T}] *śravaśraṇa*° G^{ac} 5 *vā dharmīti* G] *bādhadharmīti* E^{T} 5 *vṛkṣa*°G^{pc}E^{T}] om. G^{ac} 7 *nīlatayā* E^{T}] *nīlata*° G 7 *upanītas* E^{T}] *parīta* G 9 *niṣṭhāyām ātma*° G^{pc}E^{T}] *niṣṭhāyātma*° G^{ac} 12 *vastutvān* E^{T}] *vastutvan* G 15 *vivaditavyam* G] *veditavyam* E^{T} 24 *kālpanikaṃ* G^{pc}E^{T}] *kālpakunikaṃ* G^{ac} 26 *rūpeṇa* G^{pc}E^{T}] *rū* G^{ac}

तस्य साध्यार्थो यत्नस्तथा परस्यापि साध्यार्थिन एव धर्मिरूपगवेषणम् । सो ऽयं तदनादरोदारवत्प्रसवार्थिनो न प्रेक्षां लक्षयति । ततो यस्य साध्यस्य धर्मिस्वरूपविशेषनिष्ठयैव प्रतिहतिस्तदनुमानेनालम् ।

सिद्धे धर्मिणि संदिग्धो धर्मः साधनमर्हति ।
धर्मिरूपविशेषस्य निष्ठायां तु हतो हतः ॥[15] G78r

अत एव,

समयाहितभेदस्य परिहारो ऽपि धर्मिणः ।
प्रमासिद्धविशेषे हि धर्मिण्येवमसम्भवः ॥[16]
अनुमानप्रसिद्धे ऽपि सम्बन्धविदपेक्षया ।
रूपं तदनुसारेण विशिष्टमुपकल्पितम् ॥

तथा सम्भवे ऽपि पुनरयं च प्रकाशस्तथेति वक्तुमशक्तेः पुनस्तदवस्थः प्रकृतहानिदोषः ।

नीले धर्मिण्यभ्युपेतस्य बाधा
सिद्धो नान्यः सत्य इष्टो वृथा च ।
रूपनिष्ठा सम्भवे तत्त्व एवा-
रेकः केकासाधने यद्वदुक्तः ॥

किं च यद्येन रूपेणेत्यादिप्रयोगे, यदि नैकं नानेकं च नीलादिविज्ञानेनेति पक्षधर्मोपसंहारस्तदा को दोषः । ततश्च शक्यमेवं पठितुम्,

---

15 *Sākārasaṃgraha* 124.

16 Cf. *Pramāṇavārttika* 4.76, *samayāhitabhedasya parihāreṇa dharmiṇaḥ | prasiddhasya gṛhītyarthāṃ jagād ānyaḥ svayaṃ śrutim* ||

---

1 *'yaṃ* E^{T}] *'rtha* G? 2 *prekṣāṃ* E^{T}] *prekṣī* G 23 *rūpeṇe°* G^{pc} E^{T}] *rūpenaṇe°* G^{ac}

येन रूपेण यन्नैकं नानेकं तेन तन्न सत् ।
यथा ⌊सातु⌋⌊मसातेन⌋ प्रकाशेनासितं तथा ॥[17]

तावद्देशव्यापिनो नीलस्येव प्रकाशस्यापि स्थूलाणुरूपविरहः केन वार्यते । ततो ऽस्ति नीलं न तु प्रकाशरूपेणेति । ततो भिन्नजडरूपसिद्धिः । अलीकस्तु प्रकाशात्मा । युक्तं चैतत्,

विद्युदुद्योतसङ्काशः प्रकाशः कस्यचित्क्वचित् ।
तमपेक्ष्य स्थिरो बाह्यः प्रकाशे ऽलीकता ततः ॥[18]
अलीकनीलजनने यथा शक्तिर्मता धियः ।
अलीकबोधजनने तथा शक्तिर्मता बहिः ॥[19]
नैवं त्वयाप्यनिष्टेरित्येतद्वक्तुं न लभ्यते ।
ईदृक्साधनमज्ञात्वा ममानिष्टिर्यतो ऽभवत् ॥[20]
प्रकाशः केवलो नापि क्वचित्केनचिदीक्षितः ।
सुखादिरपि विज्ञेयाकारो बुद्धिस्ततः परा ॥[21]
प्रतिभासाद्यभिज्ञानं सुखं सो ऽस्ति ⌊शितेरपि⌋ ।
प्रतिभासे ऽप्यभेदेन प्रतिभासः ⌊शितेरपि⌋ ॥

अथ व्याप⌊कानुपलम्भस्य⌋ तत्रावतारयितुमशक्तिः । एवं तर्हि दुःखमपि प्रकाशात्मैवेति न कदाचि⌊त्प्रहीयेत⌋ । अपि ⌊चैवमवय⌋व्यादेः प्रत्युज्जीवनप्रसङ्गात्सर्वमादितः प्रभृति शीर्णम् । तस्मान्न क्वचिदभेद⌊प्रतिभासे⌋ भेदसिद्धिः । अत एव सर्वो भेदहेतुर्व्यवहारसाधन इत्युक्तम् ।

---

17 *Sākārasaṃgraha* 92.
18 *Sākārasaṃgraha* 127.
19 *Sākārasaṃgraha* 128.
20 *Sākārasaṃgraha* 129.
21 Cf. *Sākārasaṃgraha* 130, *prakāśaḥ kevalo nāpi kvacit kenacid īkṣitaḥ | tato 'numānapratyāśā pratyāśaiva hi kevalā* ||.

---

2 *sātam* G] *śātam* E^T 2 *asātena* G^{pc}] *aśātena* E^T, *āsātena* G^{ac} 16 *śiter api* $G^{pc}E^T$] *śiterepi* G^{ac} 17 *śiter api* $G^{pc}E^T$] *śiterepi* G^{ac} 19 *°ānupalambhasya* G] *°ānupalambhas tasya* E^T 20 *prahīyet* G] *prahīyeta* E^T 20 *caivam avaya°* $G^{pc}E^T$] *caivaya°* G^{ac} 21 *°pratibhāse* $G^{pc}E^T$] *°sipratibhāse* G^{ac}

ये ऽप्याहुः द्वैताभासो धर्मी भ्रान्तत्वात्सत्यसङ्गतो ऽवश्यं तैमिरिकचन्द्रबिम्बद्वयनिर्भासो यथादृष्ट इति, तेषामप्यसत्प्रकाशो भ्रान्तिरभिमतेत्येषा प्रत्याशा । सा च नित्यस्येत एव निरस्ता । एवं मायाख्यातिरसत्येत्याद्यपि निरस्तम् । न च मायाकारो नाम स्वप्रकाशाकारव्यतिरिक्तः सिद्धः । ज्ञानान्तरभवं च ज्ञानान्तरमिष्टमिति । ये ऽप्यनुवृत्तव्यावृत्तरूपतया भेदमाहुः, तेषामपि कल्पनामात्रमेतत्, सामान्यवत्प्रमाणसिद्धेरभावादित्युक्तप्रायं वस्त्रोदकप्रस्तावे । तदयम्,

प्रकाशं नीलमित्येतद्भिन्नोपाधिनिबन्धनम् ।
विशिष्टप्रत्ययत्वेन कुण्डलीप्रत्ययो यथा ॥

इत्येतत्पर्यवसानो वादः । तस्माद्यथास्वं समनन्तरप्रत्ययप्रभवेषु नीलपीतादिषु प्रकाशभेदेषु परापोहमात्रव्यवस्थापितशरीरः, प्रकाशो नाम कल्पितं धर्ममात्रमेतत्, G 78v
तेषामपाये ऽप्यनुपहतमिति स्थवीयसी भ्रान्तिः । अथ विपरीतो धर्मधर्मिभावः प्रसिद्धः, तत्रापि न प्रमाणव्यापारः, विपर्ययस्त्वस्ति ।

भेदो ऽनुभूतिमान्धर्मी धर्मो जात्यादिकल्पितम् ।
विपर्ययः पुनः कस्मादिष्टः श्रद्धेयनीलयोः ॥

केवलमन्वयव्यतिरेकाभ्यां भेदमास्थाय विवेकदुर्बलो लोक एष मृदि संस्थानादिवत्भेदं धर्मिधर्मिताविपर्ययं च व्यवहरतीति नात्राभिनिवेशः । न च पृथग्धर्मित्वमनयोरुपगमक्षमः,

यदि प्रकाशो नीलादिः किं प्रकाशान्तरेण वः ।
अथाप्रकाशो नीलादिः किं प्रकाशान्तरेण वः ॥[22]

[22] *Sākārasaṃgraha* 29.

3 *nirastā* E^T conj.] om. G 13 *sthavīyasī* E^T] *sthaviyasī* G

न खलु स्वयमप्रकाशं परेण नाम प्रकाशीभवति, यो हि यस्य स्वभाव इत्यादिवचनात् । अथालीकाभिमानिनः स्वभावान्तराभावान्नैवमिति मतिः । स्वभावान्तरविरहादेव तर्हि प्रकाशमात्रमस्य स्वभाव इति किं प्रकाशान्तरेण । क्वारूढं तदलीकमाभासतामिति तु ज्ञानादिसमाश्रयात्मवादेन तुल्यम् । अयं तु विशेषः, प्रमेयस्यात्मनो ऽप्रकाशतयापि स्थितिरविरुद्धेति प्रहारान्तरमपेक्षते, प्रकाशात्मनस्तूच्चारणमपि न क्षमत इति किं विफलगुरुभिरायासैः । मा भूद्वालीकत्वे स्वप्रकाशवर्जनम् । तेन तस्यानात्मभूतस्य प्रकाशने बाह्येन कीदृशः कृतो ऽपराधः ।

अलीके तस्य शक्तिश्चेद्वस्तुन्यस्तमयेत्कथम् ।
निर्विबन्धमतः सिद्धो धर्मोत्तरमनोरथः ॥

यदि साहायकापेक्षा वस्तुन्येव स्फुरत्यसौ ।
तादात्म्यकल्पनायाश्च पात्रं वस्त्वेव युज्यते ॥

अलीकभेदस्फुर्त्तौ च नाकारस्य यथाश्रयः ।
बाह्यभेदप्रकाशे च तथाकारेण किं फलम् ॥

अथ बाह्यान्ययोर्नैकयोगक्षेमत्वमिष्यते ।
बाधापि बाह्यस्यैवास्तामलीकत्वमतः कुतः ॥

बाह्यस्य सिद्धिरिव बुद्धिकृतास्तु बाधा-
प्यौचित्यमेतदसकृद्व्यवलोकितं च ।
सिद्धिर्धियः परधियो न यथा तथा न
बाधापि न स्वमुपहन्ति बहिर्मतो ऽपि ॥

इत्यन्तरश्लोकः । न चालीकस्यासद्रूपत्वात्क्वचिच्छक्तिरिति साधकतमत्वापेक्षः करणभावो ऽपि यत्नसाधितो ऽयत्नशीर्णः । विज्ञाननयावतारणार्थश्चायं क्रमः संमतः । अतश्चैवं यत्द्वैतरूपसिद्धौ पुनरसाधारणो निर्बन्धः प्रमाणवार्तिके, ततो यदि निराकारमेव तत्त्वतो ज्ञानमभिमतम्, आस्तां तावदाकारस्य कारणतास्थितिः, आकारवद्बाह्यस्यापि वेदनानपह्नवत्वात्कुतो विज्ञानमात्रतासिद्धिरित्यलीकाकारसाधनं स्वव-

---

1 *prakāśi°* G^{pc} E^{T}] *prākāśi°* G^{ac} 2 *°vacanāt* G^{pc} E^{T}] *°canāt* G^{ac} 3 *prakāśā°* G^{pc} E^{T}] *prakā°* G^{ac} 5 *°yāpi* G] *°yā* E^{T} 6 *viphala°* G^{pc} E^{T}] *phala°* G^{ac} 12 *sāhāyakā°* G^{pc} E^{T}] *sāyakā°* G^{ac} 23 *chaktir* G^{pc} E^{T}] *chaśaktir* G^{ac} 26 *kāraṇatā°* G^{pc} E^{T}] *kāraṇātā°* G^{ac}

धाय कृत्योत्थापनं यत्नेनेत्यायातम् । अभिन्ने त्वाकारे स्वरूपविशेषान्नीलं दृष्टं न पीतमित्यवसायसाधनसामर्थ्याद्बहिरभावेऽप्याभिमानिकी प्रमाणव्यवस्था तावत्सिध्यति । ततः प्रारब्धविचारस्य ग्राह्यल-क्षणाभावात्स्ववेदनमात्रसिद्धेरप्रतिबन्धः । अत एव तदन्ते, G79r

नीलादिरूपस्तस्यासौ स्वभावो ऽनुभवश्च सः ।[23]

इत्यादि ब्रुवाणः शोभेत । अथैवमपि पश्चाद्व्यापकाभावाद्बाह्यस्याकारस्य वा वस्तुतां निरस्य प्रकाशमात्रं स्थापयिष्याम इत्यभिप्रायः । तर्हि किमादितः प्रभृत्याकारराक्षसप्रसाधनप्रबन्धेन । यथैव निराकारेयं बुद्धिराकारवान्संवादो बाह्य इति स्वपरमतिः, तथैव व्यापकानुपलम्भमवतार्य कार्यसिद्धिरस्तु । ततः कुतो ग्राह्यलक्षणचिन्ता । न वा प्रकाशमानसहोपलब्धौ हेतू वक्तव्यौ, आकारसाधनद्वारेण दोषात्, व्यापकानुपलम्भस्यावश्यमपेक्षणाच्चेति साधु सिद्धं धर्मोत्तरसमीहितेन ।

एतदेव च प्रकारत्रयमाचार्यस्य सर्वत्र विज्ञप्तिमात्रतासाधनमाञ्जसं पश्यामः, समर्थनतात्पर्यं चात्रैव, व्यापकानुपलम्भे तु पूर्वाचार्यचर्चिते ऽनुमतिमात्रम्, स्थूलवत्परमाणुदुषणाभावात् । ततो यदि धर्मोत्तरे परमाणुप्रतिविधावनवधानम्, एकमनेकं च रूपं तेषां नेति वचनादयत्नो मुख्यतया चानुपन्यासः सिद्ध एवेति सकलमाकुलमाचार्यमतमत्र मते । न च तावता क्षतिः काचिद्, यदि न्यायगन्धः स्यात् । तत्र किञ्चिदुक्तमेव । किं च मा वेदि बाह्यं प्रकाशवेद्यमलीकमित्यपि प्रकारान्तरेण ग्राह्यग्राहकस्थितिरुपनता । तेनाप्रकाशने च प्रसज्य स्वप्रकाशतावकाशिनीति किं प्रकाशान्तरेण । तस्मात्सिद्धाः स्वसंवेदनत्वेन ज्ञानरूपारूपशब्दादयः, असाधारणत्वस्यापि बहिरर्थदूषणे ऽस्माभिः प्रसाधनात् । अत्रापि स्वसंवेदनमात्रमनैकान्तिकं तात्त्विकं चासिद्धमिति बालविभीषकातो न भेतव्यम् । कल्पितस्यानुपपत्तेः तात्त्विकस्यैव साधितत्वान्न विकल्पद्वयावकाशः ।

अत एव विज्ञानस्याप्याकारानतिरेकादलीकतां साधयेतो नासिद्धिरनेका-

[23] *Pramāṇavārttika* 2.328ab.

2 °*sādhana*° G^{pc} E^{T}] °*sādhanā*° G^{ac} 2 *abhāve* G] *bhāve* E^{T} 3 *grāhya*° G^{pc} E^{T}] *grāhyugrāhya*° G^{ac} 6 *'nubhavaś* G^{pc} E^{T}] *'nubhāvaś* G^{ac} 11 *vyāpakā*° G] *vyavasthā*° E^{T} 12 °*sādhana*° G^{pc} E^{T}] °*sādhāna*° G^{ac} 16 °*vidhāvana*° G^{pc} E^{T}] °*vidhāna*° G^{ac} 17 *cānupanyāsaḥ* G] *cānupaśyāmaḥ* E^{T} 19 *alīkam* G^{pc} E^{T}] *alīkatyam* G^{ac} 20 *prakārā*° G^{pc} E^{T}] *prakāro* G^{ac} 20 °*āprakāśane* G^{pc} E^{T}] °*āprakāśene* G^{ac} 20 *ca* G^{pc} E^{T}] *ce* G^{ac} 21 °*rūpārūpa*° G] °*rūpā rūpa*° E^{T} 23 *bhetavyam* G^{pc} E^{T}] *bhedatavyam* G^{ac} 25 *sādhayeto* G] *sādhayato* E^{T}

न्तो वा शक्यः । यदपि विपर्ययेणोच्यते, यस्य यदबाध्यं रूपं तस्यासौ प्रकृतिः, तद्यथा सर्वधर्माणां बोधात्मा । अबाध्यं च रूपं बोधात्मनः सत्त्वमिति स्वभावहेतुरिति, तदप्यनेनैव निरस्तम् । भिन्नस्य धर्मिणो ऽसिद्धेर्नीलस्य च बाधनादिति ॥ तस्मात्,

नाकार॒चक्र॒मवधूय धियो ऽस्ति वृत्ति-
स्तद्बाधके बलिनि मध्यनये जयश्रीः ।
नो चेदनिन्द्यमिदमद्वयमेव चित्रं
चेतो निराकृति॒मतस्य॒ तु को ऽवकाशः ॥[24]

महापण्डितज्ञानश्रीमित्र॒विरचिता॒यां साकारसिद्धौ
नि॒राकार॒नि॒राकरण॒परिच्छेदः प्रथमः ॥

[24] Cf. Quotation in *Sekanirdeśapañjikā, nākāracakram avadhūya dhiyo 'sti vṛttas tadbādhane balini madhyanaye jayaśrīḥ | no ced anindyam idam advayam eva citraṃ ceto nirākṛtimatasya tu ko 'vakāśaḥ ||*

6 °*cakra*° em.] °*bheda*° E^T, om. G 9 °*matasya* G^{pc} E^T] °*masatasya* G^{ac} 12 °*viracitā*° G^{pc} E^T] °*vicitā*° G^{ac} 13 *nirākāra*° G^{pc} E^T] *nirākāraṇa*° G^{ac} 13 °*nirākaraṇa*° G^{pc} E^T] °*nirākāraṇa*° G^{ac}

Ven. Ananda [Bangladesh]
- dilokananda@gmail.com
+66-0833214070

- Hejung [Korea Mont
bhikkhukavisara@gmail.com

Junglan, Bang
- orchidbang@gmail.com

- Wonseo. whitus161@gmail.com. [Korea Monke

- Baitue: profafashi@gmail.com.
- K.harimoto@gmail.com
- jajacobson@wesleyan.edu
- ishvarapratyabhijna@gmail.com
- t.gerloff@your-side.de
- gregseton@gmail.com
lozangzopa@gmail.com
giulianogiustarini@gmail.com